HPMUL/2017/77762

ISSN 2582-2608

# निःश्रेयसी

## (NISSHREYASI)

Peer Reviewed Research Journal of Adwaita Vedanta

2019

Vol. 03



## DEPARTMENT OF ADVAITA VEDANTA

VEDAVYAS CAMPUS

Rashtriya Sanskrit Sansthan, Balahar

Himachal Pradesh-177108

www.rsksbalahar.ac.in

योऽनूचानः स नो महान्।

राष्ट्रियसंस्कृतसंस्थानम्

HPMUL/2017/77762 ISSN 2582-2608

# NISSHREYASI

PEER REVIEWED ANNUAL RESEARCH JOURNAL OF ADWAITA VEDANTA

VOL. 03. 2019

PATRON

PROF. P.N. SHASTRI
(Vice-Chancellor, Rastriya Sanskrit Sansthan, New Delhi)
Mob. No. 09425682271
e.mail:-rskspvc@yahoo.com

CHIEF EDITOR

PROF. LAXMI NIWAS PANDEY
(Principal, Rastriya Sanskrit Sansthan, Vedavyas Campus Balahar, Kangra H.P.)
Mob. No. 9816400536
e.mail:-principal.garli@gmail.com

EDITOR

Dr. BHAGABAN SAMANTARAY
(H.O.D., A. Vednata, Rastriya Sanskrit Sansthan, Vedavyas Campus Balahar, Kangra H.P.)
Mob. No. 89172-24154
e.mail:-vedanta.bsr@gmail.com

EDITORIAL COMMITTEE

Dr. Manjunath Bhat S. G.
Associate Professor, Rastriya Sanskrit Sansthan,
Vedavyas Campus Balahar, Kangra H.P.
Mob. No. 75056-39178
e.mail:-sgmbhat@gmail.com

Dr. Rajan Mishra
Assistant Professor (Guest) Dept. of Education
Vedavyas Campus Balahar, Kangra H.P.
Mob. No. 9918658077
e.mail:-rajanmishrabhu@gmail.com

K. Manognya
Assistant Professor (Guest) Dept. of Vedanta
Vedavyas Campus Balahar, Kangra H.P.
Mob. No. 73309-38104
e.mail:-19mano96k@gmail.com

Dr. K. Sree Sameeraja
Assistant Professor (Guest) Dept. of Vedanta
Vedavyas Campus Balahar, Kangra H.P.
Mob. No. 8108711080
e.mail:-k_srisameera@yahoo.co.in

Co-ordinated by IQAC Vedavyas Campus, Balahar (H.P.)

# विषयसूची


| | | |
|---|---|---|
| 1. | अद्वैतदर्शनानुसारं रंगोजिभट्टानां पदार्थचिन्तनम् | प्रो. श्रद्धा उपाध्ये |
| 2. | कठोपनिषन्मन्त्राणां ब्रह्मसूत्रभाष्यसन्दर्भे परिशीलनम् | डॉ. सतीशः के. एस्. |
| 3. | श्रीरामानुजसम्प्रदायस्याचार्यपरम्परा एवं यामुनरामानुजवेदान्तदेशिकानां विशिष्टाचार्याणां व्यक्तित्वं कृतित्वञ्च | डॉ. सुदर्शनन् एस्. |
| 4. | जन्तूनां नरजन्म दुर्लभम् | प्रो. के. बि. सुब्बरायुडु |
| 5. | सप्तशत्यां मायास्वरूपम् | डॉ. मंजुनाथ एस. जी. |
| 6. | वाक्यपदीयानुसारम् आगमाधीनं धर्माधर्मयोः परिज्ञानम् | डॉ. जयकृष्णः |
| 7. | श्रीमद्भगवद्गीतोक्तदिशा क्षेत्रक्षेत्रज्ञस्वरूपविचारः | डॉ. जि. नरसिंहुलुः |
| 8. | मायाजगत्कारणत्वविचारः | डॉ. सम्बितमहापात्रः |
| 9. | मीमांसाशास्त्रे भाट्टसम्मतप्रमास्वरूपविमर्शः | डॉ. टि. उमेशः |
| 10. | 'सोमेन यजेत' इति वैदिकवाक्यस्य अर्थनिर्णये मीमांसापराक्रमः | डॉ. श्रीरामः ए. एस् |
| 11. | अद्वैतवेदान्तानुसारेण जीवेश्वरस्वरूपविमर्शः | श्रीअजयकुमारगन्धा |
| 12. | नारायणीये वेदान्ततत्त्वविमर्शः | डॉ. गणपतिः वि. हेगडे |
| 13. | प्रधानजगत्कारणवादनिरासः | डॉ. श्रीकरः जि. एन्. |
| 14. | मिथ्यात्वे अनुमानप्रमाणविचारः | डॉ. राजन् मिश्रः |
| 15. | अद्वैतवेदान्ते वादानां समीक्षा | सञ्जीवसरकारः |
| 16. | वेदान्तशास्त्रे प्रत्यक्षप्रमाणविचारः | संदीपकुमारः |
| 17. | अद्वैतनये प्रमाणविचारः | राजेशकुमारः |
| 18. | आस्तिकदर्शनानां मोक्षस्य महायानबौद्धदर्शनस्य निर्वाणेन सह तुलनात्मकं विवेचनम् | अमियकृष्णमिश्रः |
| 19. | कर्मण्येवाधिकारस्ते (तुम्हारा अधिकार कर्म करने में ही है) | प्रो. विजयपालशास्त्री |
| 20. | हिन्दी साहित्य में प्रमाण-विमर्श | पीयूष कुमार त्रिपाठी |
| 21. | अद्वैत वेदान्त में प्रमाण स्वरूप विचार | डॉ. राम नारायण ठाकुर |
| 22. | श्रीमद्भगवद्गीता के द्वितीय अध्याय में निहित समायोजन का तथ्यात्मक विवेचन | नेहा श्रीवास्तव |
| 23. | Svarupalaksana and Tatasthalaksana of Brahman : A Critical Appraisal of 'Svaprakasatva' of Suddha Caitanya | Nataraju Adarasupally |
| 24. | Means of Attaining Self-Knowledge (A Study in Śankara Bhaṣyas) | Dr. Shakuntla |
| 25. | Nigrahasthanas-the Visistadvaita and Dvaita systems | Himani |

ISSN 2582-2608

# श्रीरामानुजसम्प्रदायस्याचार्यपरम्परा एवं यामुनरामानुजवेदान्तदेशिकानां विशिष्टाचार्याणां व्यक्तित्वं कृतित्वञ्च

डॉ. सुदर्शनन् एस.

कस्यचिदपि सम्प्रदायस्य शास्त्रसमधिगततत्त्वप्रतिपादकस्य समाश्रयणं तदैव भवति यदा तस्याचार्यपरम्पराया ज्ञानं तन्महिमा च ज्ञायते। आचार्यानुग्रहस्य तत्त्वज्ञानावाप्तये परमहेतुता भारतीयसम्प्रदायेषु विदितैव। तत्त्ववेत्तारः सम्प्रदायीयाचार्या एव भवन्ति। तदुक्तं भगवता–

**तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।**
**उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनः तत्त्वदर्शिनः।।**[1]

गुरूपदेशादिकं विना स्वतन्त्र्येणार्जितं ज्ञानं कुत्सितमेव ध्रुवं भवति। विषयवासनासहितबोधस्यापवर्गकारकस्य तत्स्वभावत्त्वात्। अंतस्तत्त्ववेत्तुर्गुरुसकाशादेव ज्ञानार्जनं कार्यमिति सर्वसम्प्रदायसहमतिः।

**यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ**
**तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः।।**[2]

इत्यादिष्वाचार्यमहत्त्वमनेकधा प्रतिपादितमेव। ईश्वरभजनं विनाऽपि गुरुभजनमात्रं सम्यगनुष्ठीयमानमेव सकलश्रेयोनिदानमपि भवति।

(1) **श्रीमन्नारायणः**–अस्य रामानुजसम्प्रदायस्याद्याचार्यः स्वयं श्रियः पतिर्भगवान् नारायण एव। तत्र च बृहदारण्यकोपनिषदेव प्रमाणं भवति–

**'अथ वंशः पौतिमाष्यो गौपवनात् गौपवनः पौतिमाष्यात् ......... सनातनः सनकात्, सनकः परमेष्ठिनः परमेष्ठी ब्रह्मणो, ब्रह्म स्वयंम्भु। ब्रह्मणे नमः'**[3] इति।

इयं श्रुतिगुरुपरम्परां प्रकाशयति। अत्रान्ते उक्तस्वयम्भुशब्दार्थः परं ब्रह्म नारायण एव। उपदेशमन्तरेण विद्याप्रवर्तकत्वात् तस्य स्वयम्भुवाच्यता।

**'नारायणाद्विनिष्पन्नं ज्ञानं कृतयुगे स्थितम्'**[4]

इति स्मृतिरपि प्रमाणपदवीमर्हति।

(2) **महालक्ष्मीः**–नारायणपट्टमहिषी द्वितीयाचार्या भवति। तस्याः सर्वावस्थासु नारायणविशिष्टत्वात् स्वयंगुरुत्वं सिद्ध्यति।

(3) **श्रीविष्वक्सेनः**

**श्रीरङ्गचन्द्रसमिन्दिरया विहर्तुं विन्यस्य**
**विश्वचिदचिन्नयनाधिकारम्।**
**यो निर्वहत्यनिशमङ्गुलिमुद्रयैव**
**सेनान्यमन्यविमुखास्तमशिश्रायाय।।**[5]

इति प्रतिपादितदिशा जागतिककार्यस्य कृत्स्नस्य विष्वक्सेनमुखेनैव जगत्पतिभ्यो दिव्यदम्पतिभ्यां निरुह्यमाणत्वादयमपि गुरुत्वं भजते।

श्रीप्रश्नसंहितायां भगवता लक्ष्म्या अन्तःपुरे मन्त्रोद्धारक्रमेण मन्त्रद्वयोपदेशः साङ्गशरणागतिस्वरूपोपदेशश्च कृत इति विज्ञायते। संहितान्तरे च शरणागतिशास्त्रमिदं लक्ष्मीर्विष्वक्सेनायोपदिदेशेति प्रमाणोपलम्भात् विष्वक्सेनस्तृतीयो गुरुः। आद्यत्रयगुरूणां श्रीवेदान्तदेशिकृतमङ्गलपद्यनामानि–

**कमप्याद्यं गुरुं वन्दे कमलागृहमेधिनम्।**
**प्रवक्ता छन्दसां वक्ता पञ्चरात्रस्य यः स्वयम्।।**
**सहधर्मचरीं शौरेः सम्मन्त्रितजगद्धिताम्।**
**अनुग्रहमयीं वन्दे नित्यमज्ञातविग्रहाम्।।**
**वन्दे वैकुण्ठसेनान्यं देवं सूत्रवतीसखम्।**
**यद्वेत्रशिखरस्पन्दे विश्वमेतद् व्यवस्थितम्।।**[6]

(4) श्रीशठकोपमुनिराचार्यो तुरीयाचार्यो भवति। अयमेवाचार्यः नम्मात्वार् 'पराङ्कुश' वकुलाभरणादिनामभिरपि स्तूयते।

अयमेवाचार्यः द्रमिडोपनिषद्द्राविडवेदेत्यादि नानाशब्दविशेषैः प्रतिपाद्यमानदिव्यगाथासहस्रस्य प्रणेता।

यद्यपि व्यासबोधायनब्रह्मनन्दिप्रभृतिभिराचार्यैर्वेदान्तशास्त्रसम्प्रदायस्याविच्छिन्नरूपेण प्रवर्तमानत्वेऽपि 'नम्मालवार वैभव' ग्रन्थे 'कुरुकापुरे तिन्त्रिणी तरुगुहायां भगवद्ध्याने स्थितस्यास्य निकटे भगवता लक्ष्म्या चोपदेशाय नियुक्तः श्रीविष्वक्सेनः सर्वशास्त्रार्थमुपदिष्टवान्' इति प्रतीयते। अतोऽयं तुरीयो गुरुस्सिद्ध्यति।

अस्मिन् विषये साम्प्रदायिकप्रमाणान्तरन्तु श्रीमत्सम्प्रदायपरिशुद्धिस्था श्रीदेशिक-सूक्तिरेव-'सर्वलोकहितस्याध्यात्मशास्त्रसम्प्रदायस्य प्रथमप्रवर्तकः सर्वेश्वरः। अन्ये सर्वे तेन साक्षात् स्वयमेव वा चेतनान्तरमुखेन वा निर्मोहसमीचीनं ज्ञानदानानुग्रहे कृते प्रवर्तकाः। इत्थमनसूयादिगुणयुक्तान् प्रणिपत्याभिवाद्य च' इत्यादिरीत्या सम्यगुपसन्नानधिकारिण उद्दिश्य यथार्थदर्शिभिः यथादृष्टार्थवादिभिश्च व्यासबोधायनादिभिः यथाधिकारं प्रवर्तितस्य वेदान्तसम्प्रदायस्य एतद्युगारम्भे ब्रह्मनन्द्यादीनामनन्तरं श्रीशठकोपमुनिः प्रवर्तक आसीत्। निगमान्तदेशिकानुगृहीताचार्यवन्दनश्लोकस्तु–

**यस्य सारस्वतस्रोतो वकुलामोदवासितम्।**
**श्रुतीनां विश्रमालायं शठारिं तमुपास्महे।।**[7]

(5) तदनन्तरं भगवान्नाथमुनेः क्रमः 3684 कल्यब्दे जातोऽयमाचार्यः योगामार्गे सिद्धिं प्राप्य योगरहस्यं न्यायतत्त्वमिति ग्रन्थद्वयं निर्मियाय। अयञ्चाचार्यः श्रीशठकोपसूरेः हृदयङ्गमः शिष्यो भवति। उक्तमेव श्रीगुरुपरम्परासारे–

'मधुरकवेरारभ्य प्रवृत्तया सम्प्रदायपरम्परया श्रीसहस्रगाथादिव्यसूक्तिमुखेन योगदशायां साक्षात्काराच्च श्रीशठकोपसूरिरस्याचार्यो बभूव।' देशिकानुगृहीताचार्यवन्दनपद्यन्तु–

HPMUL/2017/77762 IMPACT FACTOR : 2021 – 6.725 ISSN 2582-2608



Vol. 05 (2021)

# नि:श्रेयसी

# (NISSHREYASI)

Peer Reviewed Research Journal of Advaita Vedanta

DEPARTMENT OF ADVAITA VEDANTA

VEDAVYAS CAMPUS

Central Sanskrit University, Balahar

Himachal Pradesh-177108

www.rsksbalahar.ac.in

योऽनूचानः स नो महान्।

केन्द्रीयसंस्कृतविश्वविद्यालयः

HPMUL/2017/77762 IMPACT FACTOR 2021 – 6.725 ISSN 2582-2608

# NISSHREYASI

PEER-REVIEWED ANNUAL RESEARCH JOURNAL OF ADVAITA VEDANTA

VOL. 05. 2021

**PATRON**

PROF. P.N. SHASTRI
(Vice-Chancellor, Central Sanskrit University, New Delhi)
Mob. No. 09425682271
e.mail:-rskspvc@yahoo.com

**CHIEF EDITOR**

PROF. LAXMI NIWAS PANDEY
(Director, Central Sanskrit University, Vedavyas Campus, Balahar, Kangra, H.P.)
Mob. No. 9816400536
e.mail:-principal.garli@gmail.com

**EDITOR**

Dr. MANJUNATH S.G.
(Associate Professor of Advaita Vedanta, Central Sanskrit University, Vedavyas Campus, Balahar, Kangra, H.P.)
Mob. No. 9458601484
e.mail:-sgmbhat@gmail.com

**EDITORIAL COMMITTEE**

Dr. Bhagaban Samantaray
H.O.D. of Advaita Vedanta, Central Sanskrit University,
Vedavyas Campus, Balahar, Kangra, H.P.
Mob. No. 89172-24154
e.mail:-vedanta.bsr@gmail.com

K. Manogna
Assistant Professor (Guest) Dept. of Advaita Vedanta
C.S.U. Vedavyas Campus, Balahar, Kangra, H.P.
Mob. No. 73309-38104
e.mail:-19mano96k@gmail.com

Dr. Rajan Mishra
Assistant Professor (Guest) Dept. of Advaita Vedanta
C.S.U. Vedavyas Campus, Balahar, Kangra, H.P.
Mob. No. 9918658077
e.mail:-rajanmishrabhu@gmail.com

Co-ordinated by IQAC Vedavyas Campus, Balahar (H.P.)

# विषयसूची



| | | | |
|---|---|---|---|
| 1. | मोक्षोपयोग्यन्तिमस्मृतेः भगवदनुग्रहैकलभ्यत्वविमर्शः | डॉ. सुदर्शनन् एस | 1-3 |
| 2. | समसामयिकदृशा न्यायवैशेषिकयोः प्रासङ्गिकता | डॉ. सत्यदेवः | 4-8 |
| 3. | वैदिकवाङ्मये मानवमूल्यानाम् आंशिकचिन्तनम् | डॉ. प्रतिज्ञा आर्या | 9-10 |
| 4. | शाङ्करवेदान्तदृष्ट्या लक्षणाविचारः | डॉ. जि. नरसिंहुलुः | 11-13 |
| 5. | अनुबन्धचतुष्टयसाधनचतुष्टययोः महत्त्वम् | डॉ. अजयकुमारगन्धा | 14-17 |
| 6. | नामधेयम्, तत्प्रामाण्यम्, तन्निमित्तानि च | डॉ. श्रीरामः ए.एस्. | 18-20 |
| 7. | बृहद्देवतानुसारं वायु-वरुणादीनां पञ्चानां नामस्वरूप-विमर्शः (वृष्टिसन्दर्भे) | डॉ. सुनीलकात्यायनः | 21-22 |
| 8. | ब्रह्मणः वेदकारणत्वम् | डॉ. श्रीकरः जि. एन्. | 23-24 |
| 9. | मोक्षलाभे भक्तेः सहायकत्वविचारः | डॉ. सम्बितमहापात्रः | 25-27 |
| 10. | विभिन्नदार्शनिकदृष्ट्या निपातार्थनिरूपणम् | डॉ. राहुलपोखरियालः | 28-33 |
| 11. | कृर्तृत्वनिर्णयः | डॉ. अयाचितः शन्तनुः | 34-35 |
| 12. | श्रीमद्भागवतपुराणे तथा महानिर्वाणतन्त्रे ओंकारस्वरूपं महिमा च | राजेश कुमारः | 36-37 |
| 13. | शतपथब्राह्मणेक्ततत्त्वैः सह श्रीमद्भगवद्गीतो तत्त्वानां समीक्षणम् | ऋतुपर्णा गायेन | 38-39 |
| 14. | अद्वैतवेदान्ते निर्गुणब्रह्मोपसनास्याः साध्यत्वविचारः | अम्बिका महारपा | 40-42 |
| 15. | यमेषु अहिंसया मानवोत्थानम् | चौति शिवानन्दः | 43-44 |
| 16. | सर्वशास्त्रोपकारकं पाणिनीयाष्टकम् | नेहा बाजपेयी | 45-46 |
| 17. | अष्टावक्रगीतायाम् अद्वैतग्रन्थेषु च जगतः स्वरूपम् | प्रेमलता | 47-48 |
| 18. | संस्कृतशास्त्र परम्परा में अनुबन्धचतुष्टय | अंग्रेज | 49-51 |
| 19. | **A Comparative Analysis of the concept of World from the Perspective of Śamkara and Vivekananda** | Dr. Parmita Chowdhury | 52-56 |




Scientific Journal Impact Factor

**CERTIFICATE OF INDEXING (SJIF 2021)**

This certificate is awarded to

**NISSHREYASI**
**(ISSN: 2582-2608)**

The Journal has been positively evaluated in the SJIF Journals Master List evaluation process
SJIF 2021 = 6.725

**SJIF (A division of InnoSpace)**

SJIFactor Project Manager
International Advisory Services
INNOSPACE INTERNATIONAL

SJIFactor Project

IMPACT FACTOR:-2021-6.725

ISSN 2582-2608

# मोक्षोपयोग्यन्तिमस्मृतेः भगवदनुग्रहैकलभ्यत्वविमर्शः

डॉ. सुदर्शनन् एस.

**शोधसारः ( Abstract)**

मोक्षो नाम आत्यन्तिकदु:खनिवृत्तिः महदानन्दप्राप्तिश्च भवति । इह जन्म भवति प्राणिनां कस्यामपि योनिविशेषे तदनु जरा, तदनु मरणं, पश्चात् पुनर्जन्म इत्येवं संसरणचक्रं प्रवर्तमानम् अस्तीति शास्त्रेभ्यः अवगन्तुं शक्नुमः। जन्मनः कारणं भवति पूर्वकृतकर्म । कर्म तद्वासनायाः क्षये सति पुनर्जन्म न स्यादेव । तर्हि कर्मणः अनिष्टफलप्रदानाद् अवरोधः कथं स्यादिति चिन्तनीयम् । कर्मवासना कम् आधारं कृत्वा अवतिष्ठते इति चिन्तिते सति ज्ञायते मनः एव आधार इति । मनसः शुद्ध्यै सदा एकस्य सात्त्विकस्य स्वरूपस्य चिन्तनं कर्तव्यम् । सात्त्विकस्य स्वरूपं तु साक्षात् भगवान् एव । सात्त्विकस्य स्वरूपस्य निरन्तरम् अभ्यस्यमाने सति कर्म तद्वासनायाः क्षयेण सह शरीरवियोगकाले भगवद्विषयकस्य अन्तिमस्मृतेः सम्प्राप्तिः भवत्येव ।-तस्याः अन्तिमस्मृतेरपि सम्पत्तिः भगवदनुग्रहैकलभ्या । एवमादिविषयान् शोधपत्रे अत्र प्रस्तूयते ।

जन्मजरामरणादिसांसारिकचक्रमिदं कथम् इव प्रवर्तते इति अनुसन्धेयं सर्वैः दार्शनिकैः। चतुरशीतिलक्ष्यसंख्याकाः जन्मयोनयः शास्त्रेषु परिपठिताः। तेषु मानवयोनौ जन्म दुर्लभं भवति इति प्रसिद्धिः। बुद्धेः क्षेमप्रापणं, तच्छास्त्रैर्विप्रतिषिद्धम्; बुद्धे चेत् क्षेमप्रापणमिहैव न दु:खमुपलभेत इत्यादि आपस्तम्बीयसूत्रानुसारैः शास्त्रस्य साक्षात् दु:खनिवारकत्वं न इति ज्ञायते।

तर्हि किमिह स्यात् प्राणिनां शास्त्रैः इति चेदुच्यते, शास्त्रस्य कार्यं शासनं भवति, विशिष्य दर्शनशास्त्राणाम्। तत्रापि वेदान्तः विशिष्टं स्थानम् आवहति। अस्मिन् शास्त्रे न केवलम् आलौकिकपदार्थानां स्वरूपवर्णनं भवति अपि तु कथम् इव तेषां पारमार्थिकी प्राप्तिरपि भवति इत्यपि उपदिश्यते। मोक्षाय शास्त्राध्ययनं न अनिवार्यं भवति। शरीरवियोगसमये अनुभूयमानस्य अन्तिमस्मृतेरेव मोक्षसाधनत्वं पुराणादिषु प्रसिद्धम्। यथा भरतः हरिणीं स्मरन् शरीरं तत्याज, तेन तस्य तत्पशुयोनावेव जननमभवत्। योगिनां विदुषामपि स्वलक्ष्यत्वेन अभिमतस्य शरीरवियोगसमये विस्मृत्या, न तत्प्राप्तिसंभवः। योगभ्रष्टस्यापि इयमेव कथा। यथोक्तं भगवता श्रीकृष्णेन-

**प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः।**
**शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते।।**
**अथवा योगिनामेव कुले भवति धीमताम्।**
**एतद्धि दुर्लभतरं लोके जन्म यदीदृशम्।।**[1]

अतः योगभ्रष्टानाम् अपि लोकान्तराय कृतं सुकृतम् अनुभूय एव इह भूमौ आवर्तनं प्रतिपादितं वर्तते। तथैव-

**जातस्य हि ध्रुवो मृत्युः ध्रुवं जन्म मृतस्य च**[2] इत्यनेन मृतस्यापि पुनर्जन्म स्मर्यते। तत्रापि जन्मान्तरस्य कारणम् अन्वेषणीयम्। कृतं कर्म त्रिविधं शास्त्रेषु परिपठ्यते। यथा सञ्चितं, प्रारब्धम्, आगामि च। सञ्चितात् लब्धं प्रारब्धं जन्मकारणं भवति। इह जन्मनि क्रियमाणं कर्म प्रारब्धादतिरिक्तम् आगामिकोटौ प्रविशति। **फलमत उपपत्तेः**[3] इति सूत्रबलात् कर्मफलप्रदत्वं भगवतः एव सिद्ध्यति।

**तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।**
**ददामि बुद्धियोगं तं येन मामुपयान्ति ते।।**[4]

इत्यनेन भगवत्परायणानां संसारतरणाय उपयुक्तं बुद्धियोगं भगवान् प्रयच्छति।

**तानहं द्विषतः क्रूरान् संसारेषु नराधमान्।**
**क्षिपामजस्रमशुभान्नासुरीष्वेव योनिषु।।**[5]

इत्यनेन दुष्कृताम् आसुरीषु योनिषु प्रवर्तनञ्च स्मर्यते। **एष ह्येवैनं साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष उ एवासाधु कर्म कारयति तं यमधो निनीषते।**[6] इत्यादिकम् अस्य प्रकृष्टतम-प्रमाणानि भवन्ति।

कोटिशः परब्रह्मज्ञानाय अर्थात् मोक्षाय प्रवृत्तानाम् उपासकानाम् अर्थात् भगवदाराधकानाम् स्वशरीरपातसमये भगवद्विषयकान्तिमस्मृतौ एव तेषां कृतकर्मणां साफल्यं निर्णेतुं शक्यम्। इह जन्मनि शरीरपातसमये अन्यान्यस्मृतौ तु तदनुगुणम् एव जन्मान्तरं स्यात्। अन्तिमस्मृतेः विषये बहुप्रमाणानि उपलभ्यन्ते। यथोक्तं भगवता श्रीकृष्णेन-

**यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम्।**
**तं तमेवैति कौन्तेय सदा तद्भावभावितः।।**[7] इति।

अनेन ज्ञायते अन्तिमस्मृतेः अनितरसाधारणं मोक्षकारकत्वम्। भरत-अजामिलादि उपाख्यानादिषु अन्तिमस्मृतेः जन्मान्तरप्राप्तिमूलकत्वं तु प्रसिद्धमेव। **मन्मना भव मद्भक्त**[8] इत्यादिरीत्या अनवतरं सत्त्वे एव तस्य साधकस्य भगवद्विषयिण्याः अन्तिमस्मृतेः संभावना इति निश्चेतुं शक्यते।

National Journal of Hindi & Sanskrit Research

National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2021; 1(37): 202-203
© 2021 NJHSR
www.sanskritarticle.com

डा. सुदर्शनन् एस्.
महाचार्यः, विशिष्टाद्वैतवेदान्तविभागे,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-
विश्वविद्यालयः, नवदेहली 16

# विशिष्टाद्वैतवेदान्तानुसारेण श्रीमद्भगवद्गीतास्थयोगाभ्यासविधिविषयकाध्यायस्य स्वरूपम्

डा. सुदर्शनन् एस्

लोके सर्वेऽपि रागद्वेषादिरूपदुःखसंसाराद्मुक्तये प्रयतन्त एव। प्रायशः दुःखाप्लावितसुखमेव प्राप्यमिति मन्वानाः जीवन्ति च। किन्तु कथमात्यन्तिकदुःखमयसंसारतरणमिति तु प्रायः न जानन्त्येवेति वक्तुं शक्यम्। आत्यन्तिकदुःखतरणशाश्वतानन्दप्राप्तिरूपमार्गनिर्णये प्रवर्तमानाः दार्शनिकाः भवन्ति। पाश्चात्यभारतीयादिदार्शनिकपक्षानामनेकेषां सत्त्वेऽपि सनातनधर्मान्तर्गतोपदेशानां प्रामाण्यमविवास्पदमिति दृढभावनया तत्रापि वेदान्तिनां प्रामुख्यं वरीवर्तीत्यतः, तत्रापि विशेषतः भेदाभेदघटकश्रुतीनां समन्वयस्थापनमुखेन श्रीशप्रभृति-दिव्यसूरि-भगवन्नाथमुनि-भगवद्यामुनि-भगवद्रामानुचार्य-वेङ्कटनाथश्रीनिगमान्तमहादेशिक-श्रीरङ्गरामानुजाचार्यादीनामुपदेशग्रन्थरचनामुखेन सकलोऽपि वेदार्थः संरक्षित एव। यद्यपि बहूनामाचार्याणां केचन ग्रन्थाः कालेन कवलीकृतास्तथापि विद्यामानास्तु सिद्धान्तज्ञापनाय प्रवर्तनाय चालमेव मन्ये। सकलोपनिषत्सारभूता श्रीमद्भगवद्गीतेति सर्वप्रसिद्धमेव। लौकिकफलाय वा भवतु, अद्यत्वे योगाभ्यासे समग्रे विश्वे प्रायः जनाः प्रवर्तमानाः सन्ति। स च योगः हठयोग इति वक्तुं शक्यते। श्रीमद्भगवद्गीतायां योगाभ्यासः कथङ्कर्तव्य इति विशेषतः षष्ठाध्याये प्रतिपादितः वर्तते। तेन प्रकारेणाभ्यसिते च न केवलं दुःखनिवृत्तिः सुखप्राप्तिश्च, अपि तु आत्मावलोकनमपि (स्वस्य अर्थाज्जीवस्यावलोकनमपि) भवतीति ज्ञायते। अतोऽयं विषयः मया चितः। परमात्मसाक्षात्कारादिस्तु तदुत्तरेष्वध्यायेषु उपायप्रतिपादनेन सहोपदिष्टः वर्तते। सकलोऽपि गीतार्थः श्रीमद्भगवद्यामुनमुनिभिः गीतार्थसंग्रहाख्ये लघुग्रन्थे विषयगाम्भीर्येण सह प्रत्यपादि। तेन गीतायाः विहङ्गावलोकनमवश्यं स्यात्। अतः केचन श्लोकाः तत्रत्याः मयात्रोपोद्घाततया प्रतिपाद्यन्ते। तत्र हि-

**स्वधर्मज्ञानवैराग्यसाध्यभक्त्यैकगोचरः।**
**नारायणः परं ब्रह्म गीताशास्त्रे समीरितः।**[1]

इत्यादावेव गीतायाः विषयजातं ज्ञापितम्। तदनु अष्टादशाध्यायभूतायाः गीतायाः प्रतिपाद्यार्थमुखेन त्रिषट्कानामप्यर्थाः त्रिभिः श्लोकैः प्रतिपादिताः । यथा-

**ज्ञानकर्मात्मिके निष्ठे योगलक्ष्ये सुसंस्कृते।**
**आत्मानुभूतिसिद्ध्यर्थे पूर्वषट्केन चोदिते।।**
**मध्यमे भगवत्तत्त्वयाथात्म्यावाप्तिसिद्धये।**
**ज्ञानकर्माभिनिर्वर्त्यो भक्तियोगः प्रकीर्तितः।।**

Correspondence:
डा. सुदर्शनन् एस्.
महाचार्यः, विशिष्टाद्वैतवेदान्तविभागे,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-
विश्वविद्यालयः, नवदेहली 16

National Journal of Hindi & Sanskrit Research

National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2021; 1(39): 168-170
© 2021 NJHSR
www.sanskritarticle.com

डा.सुदर्शनन् एस
सहाचार्यः, विशिष्टाद्वैतवेदान्तविभागे,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-
विश्वविद्यालयः, नवदेहली -16

Correspondence:
डा.सुदर्शनन् एस
सहाचार्यः, विशिष्टाद्वैतवेदान्तविभागे,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-
विश्वविद्यालयः, नवदेहली -16

# ब्रह्मशब्दस्य नारायणपरत्वनिरूपणम्

डा. सुदर्शनन् एस

ब्रह्मशब्दस्य व्याख्यानं स्वस्वमतानुसारेण वेदान्तिनः बहुधा कुर्वन्ति। **बृहत्वात् बृंहणत्वाच्च ब्रह्म**[1] इति यास्काचार्यस्य निरुक्तिः। ब्रह्मणः स्वरूपविचारे दार्शनिकेषु नैकमत्यं विद्यते। तत्रानेकश्रुतिवाक्यानि परतत्त्वस्वरूपप्रकाशनावसरेषु कण्ठतः पुरुषोत्तम-नारायणादिशब्दानां प्रतिपादनं कुर्वन्ति। तत्र प्रसिद्धकारणतत्त्वविषयकवेदवाक्यानि तु - **अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा**[2], **एष ते अन्तर्याम्य-मृतः**[3], **एकमेवाद्वितीयम्**[4], **य आत्मा अपहतपाप्मा विजरो विमृत्युः विशोको विजिघत्सः अपिपासः सत्यकामः सत्यसङ्कल्पः**[5], **नारायणपरं ब्रह्मतत्त्वं नारायणः परः**[6] इत्यादीनि। एवमेवसर्वत्र वेदेषु समुपल-भ्यमानेषु पुरुषसूक्तेषु नारायणशब्दस्य पुरुषशब्दत्वेन व्यवहारः प्राप्यते। विविधैः प्रमाणैः पुरुषसूक्तं परस्मिन् ब्रह्मणि वासुदेवे नारायणे एव निहितं वर्तते। ततश्चजगत्कारणत्वेन पुरुषोत्तमः नारायण एव ब्रह्मपदवाच्यम् इति स्वीकर्तव्यम् इति विशिष्टाद्वैतिनां मतम्। श्रीमद्भागवते महापुराणेभगवति नारायण एव सर्वस्य समिष्टिसृष्टेः कारणभूतत्वं प्रतिपादितं वर्तते ।तद्यथा-

**तस्मै नमो भगवते वासुदेवाय धीमहि।**
**यन्मायया दुर्जयया मां वदति जगद्गुरुम्।।**

इत्युपक्रम्य -

**नारायणपरा वेदा देवा नारायणाङ्गजाः ।**
**नारायण पराः लोकाः नारायणपरा मखाः।।**[7]

पूर्वोक्तप्रमाणैः भगवान् पुरुषोत्तमः नारायण एव सृष्टेः प्रागासीदिति, स एव पुरुषसूक्तेषु पुरुषोत्तमशब्दाभिधेय इति च साक्षादेव प्राप्यते। जगदिदं भगवान् विष्णुर्धृतवानित्यत्र सायणभाष्यकारस्तु। **'वातात् विष्णोर्बलमाहुः'** इति वायुना विष्णोः धारणबलमुक्तम् इति प्रतिपादितम्। **वायुर्वै गौतम तत्सूत्रं वायुना वै गौतमसूत्रेणायञ्च लोकः परश्च लोकः सर्वाणि च भूतानि सन्दृश्यानि भवन्ति** इति छान्दोग्यवाक्यमपि प्रमापकम्। पूर्णत्वाद् एव पुरुषः कथ्यते। वेदश्च- **तेनेदं पूर्णं पुरुषेण सर्वमिति** साक्षादेव प्रतिपादयति।

**स एव वासुदेवोऽयं पुरुषः प्रोच्यते बुधैः ।**
**प्रकृति स्पर्शराहित्यात् स्वातन्त्र्याद् वैष्णवादपि।**
**स एव वासुदेवोऽयं साक्षात्पुरुष उच्यते ।**
**स्त्रीप्रायमितरत्सर्वं जगद् ब्रह्मपुरस्सरम्।।**

इति पौराणिकपद्ये अपि वासुदेवस्य विष्णोः एव पुरुषशब्दाभिधेयत्वं समर्थयति।

**'सर्वं खल्विदं ब्रह्म'** इत्यनेन वेदवाक्येनकृत्स्नस्य कार्यवर्गस्य पुरुषे कारणत्वं त्रैयन्तरसिकैः क्रियते। महाभारते विष्णुपुराणादिषु च वसुदेवदेवकीदम्पत्योः पुत्रस्य वासुदेवस्यैव पुरुषशब्दप्रतिपाद्यत्वे प्रमाणानि उपलभ्यन्ते । यथा-

ISSN - 2229-6336

# SUMANGALI

## A Journal of Gender and heritage

Vol. VII, No. 1 Joint Issue March 2020 & March 2021

**Centre for Women's Studies**
**Shri Lal Bahadur Shastri National**
**Sanskrit University**
(Cental University)
**New Delhi**

# CONTENTS


| | | | |
|---|---|---|---|
| 1. | श्रीगोदादेव्या स्तुततिरुप्पावैप्रबन्धस्थ–प्रथमपाशुरस्य वेदान्तपरत्वसमीक्षणम् | डॉ.सुदर्शनन् एस् | 1 |
| 2. | वेदोक्तदिशा नारीशौर्यचिन्तनम् | खुशबू शुक्ला | 7 |
| 3. | विशिष्टबालानां सुरक्षाप्रदाने प्राचीनभारतीयनारीणां योगदानम् | नन्दुलाल मण्डलः | 14 |
| 4. | Theoretical Analysis of Gender Issues in Psycho Social Perspective | Prof. Rachna Verma Mohan | 20 |
| 5. | Woman's Rights in *Yajnavalkyasmriti* | Bikram Keshari Mishra | 28 |
| 6. | Portrayal of Indian Women in the Works of Kalidasa: A Feministic Approach | Dr. Subhasree Dash | 35 |
| 7. | The Depiction of Women's Sexuality in the Ratnāvalī Nāṭikā of Harsa | Dr. Shaminaj Khan | 44 |
| 8. | An Analysis of the Social Condition of Women as depicted in Ikshugandha | Mridusmita Bharadwaj | 53 |
| 9. | Contribution of Women in the Culture of North East India | Nayandeep Sarma | 60 |
| 10. | स्मृतियों में प्रतिपादित 'स्त्रीधन' एवं उसकी प्रासङ्गिकता | स्मिता यादव | 68 |
| 11. | आधुनिक सन्दर्भ में महिला सशक्तिकरण के विभिन्न आयाम | विजय गुप्ता | 75 |

# श्रीगोदादेव्या स्तुततिरुप्पावैप्रबन्धस्थ-प्रथमपाशुरस्य वेदान्तपरत्वसमीक्षणम्

**डॉ.सुदर्शनन् एस्,**
**सहाचार्यः, विभागाध्यक्षश्च,**
विशिष्टाद्वैतवेदान्तविभागे,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयः,
**नवदेहली16**

श्रीगोदादेवी दक्षिणभारते प्रसिद्धद्वादशदिव्यसूरिषु अन्यतमा । इयम् आण्डाल्, नाच्चियार्, कोदै इत्यादि नाना प्रसिद्धनामभिः स्तूयते । दिव्यसूरिष्वियमेकैव स्त्री । दिव्यसूरयः वैष्णवसम्प्रदायस्य प्रमुखाः आचार्याः । ते आल्वार् इति नाम्ना विश्वविश्रुताः । आल्वार् इति तमिळभाषायाः पदस्यार्थः भगवति श्रीमन्नारायणाख्यभक्तिसिन्धौ निमग्ना इति । सर्वेऽपि दिव्यसूरयः परब्रह्मणः अंशजा एव । श्रीगोदादेवी भूमिदेव्या अवतारः भवति । यथा भगवती सीता तथैव । इयं कलियुगस्य ९७तमे नलाख्यसंवत्सरे आषाढमासे पूर्वफल्गुणीताराख्ये चतुर्थ्यां तथौ श्रीविष्णुचित्तनाम्ना प्रसिद्धदिव्यसूरेः तुलसीकानने अवतीर्णा । यथोक्तं दिव्यसूरिचरिते-

**सिद्धानां शरदा कलावपगमे वर्षे नलाख्ये रवौ**
**याते कर्कटकं विधावुपचिते षष्ठेऽहनि श्रीमति ।**
**नक्षत्रेऽर्यमदैवते क्षितिभुवो वारे चतुर्थ्यां तिथौ**
**गोदा प्रादुरभूदचिन्त्यमहिमा श्रीविष्णुचित्तात्मजा ॥**[1]

**कर्कटे पूर्वफल्गुण्या तुलसीकाननोद्भवाम् ।**
**पाण्ड्ये विश्वंभरा गोदा वन्दे श्रीरङ्गवल्लभाम् ॥**[2]

अत्र पाण्ड्ये इत्यनेन पाण्ड्यराज्यस्थस्थानं सूच्यते । श्रीविल्लिपुत्तूर् इति तत्स्थानं प्रसिद्धमद्यापि तमिळनाडुप्रदेशे । पितुः विष्णुचित्तस्य इव इयमाबाल्याद् श्रीकृष्णकथामृतौ निमग्ना तत्पुरीशं भगवन्तं वटपत्रशायिनं कृष्णमाराधयामास । आबाल्यात् भगवन्तं श्रीमन्नारायणमेव पतित्वेन वृणुयामिति बद्धसङ्कल्पेयं कदाचित् काले भगवत्प्रेरणयैव स्वयं भगवन्तं भूलोकवैकुण्ठवासिनं श्रीरङ्गनाथं तदानीन्तनसर्वलोकसाक्षित्वे स्वामित्वेन वैवाहिकमहोत्सवे सम्प्राप्य सशरीरम् अन्तरधात् ।

National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2022; 1(42): 195-197
© 2022 NJHSR
www.sanskritarticle.com

**डा. सुदर्शनन् एस्.**
महाचार्यः,विशिष्टाद्वैतवेदान्तविभागे,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-
विश्वविद्यालयः, नवदेहली 16

**Correspondence:**
**डा. सुदर्शनन् एस्.**
महाचार्यः,विशिष्टाद्वैतवेदान्तविभागे,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-
विश्वविद्यालयः, नवदेहली 16

# श्रीभाष्यानुसारं तदन्तरप्रतिपत्त्यधिकरणविचारः

**डा. सुदर्शनन् एस्**

ब्रह्मसूत्रस्य साधनाध्याये पञ्चाग्निविद्यायाः विषय आदौ विचारः क्रियते। अयं विचारः वैराग्यपादस्य एकः विषयः भवति। वैराग्यपादे ब्रह्मोपासकस्य ब्रह्मेतरवस्तुषु वैराग्यसम्पादनार्थं जन्मजरामरणरूपसांसारिकचक्रे भ्रममाणस्य देहिनो जीवस्य जाग्रदवस्थाशेषभूतानां प्रचुराणां दोषाणाम् अपुरुषार्थत्वभूतानां चिन्तनमुखेन विचारः प्रवर्तते। तेन विचारकस्य दृढं वैराग्यम् उदयत्येव। मानवजन्मप्राप्तिः न तथा सुलभेति शास्त्राध्येतॄणां दृढीयान् विश्वासः। अतः प्राप्तममुं देहं प्लवसदृशं सम्यक्लक्ष्यनिर्धारणपुरस्सरं ब्रह्माख्यलक्ष्ये संसारस्य पारं विद्यामाने स्वस्य प्राप्तिरेव श्रद्धावतः परमं कार्यं भवति। तदर्थं लक्ष्यव्यतिरिक्तेषु पूर्वाभ्यसितवासनया गमनस्य निरोधनाय तासां वासनानां समूलनाशाय युक्तितर्कादिसहृतपरिनिष्पन्नं ज्ञानं समर्थमिति तु निश्चप्रचम्। देहादिभ्यो विलक्षणः अहंपदार्थगोचरीभूतः कश्चदस्तीति सूक्ष्मेक्षिकया स्वस्य अनुसन्धातुः अपि सम्भवत्येव। न तेन कृत्स्नस्य स्वस्य पूर्वजन्मनां तदनु जन्मान्तराणां जीवनज्ञानं तेभ्यः तेभ्यः उत्क्रान्तौ गमनादिकं न तथा स्फुरति येन स्वतः एव वैराग्यं उदयेत। मातासहस्रेभ्योऽपि वत्सलतरा श्रुतिः आदौ परोक्षमपि तदनुयायिनां भूयिष्ठश्रद्धावैराग्यादि यथापेक्षितं समाकलयितुम् अनुगृह्णाति। श्रुतीभ्यः तदनुगणवतां स्मृतीभ्यश्च नावदण्डभूतानाम् असाधारणानुग्रहेण नूनं दुःखसंसाराख्यं परिभ्रमणचक्रं तर्तुं शक्नुयामः । अहंशब्दार्थभूतः जीवसंज्ञया परिपठ्यते शास्त्रेषु। पञ्चाग्निविद्यायां छान्दोग्ये जीवस्य देहान्तरप्राप्तिविषये बाहुल्येन वाक्यानि प्राप्यन्ते। तानि वाक्यानि विचारार्थं ब्रह्मसूत्रकारैः सूत्राणि निबन्धानि, यानि तदन्तरप्रतिपत्त्यधिकरणनाम्ना विचारितानि। अत्र अधिकरणे देहात् देहान्तरं गच्छतः जीवस्य गतागती विचार्यते, तत्र गतागतौ देहारम्भहेतुभूतैः भूतसूक्ष्मैः सहैव परिभ्रमतीति निश्चीयते शास्त्रकारैः, तेन अधिगन्तुः गमनागमनज्ञानसम्पादनेन दुःखभूयिष्ठत्वज्ञानं सुस्थिरं जायते, तेनापि वैराग्यस्य सुदृढस्य निष्पत्तिः।

अस्मिन्नधिकरणे सप्त सूत्राणि सन्ति। प्रथमसूत्रे[1] शरीरान्तरप्राप्तौ जीवः शरीरान्तरस्य आरम्भकारणभूतैः भूतानां सूक्ष्मैः संश्लिष्ट एव मन् गच्छति, छान्दोग्ये पञ्चाग्निविद्यायाः प्रकरणस्थितानां प्रश्नोत्तराणां परिशीलनेन निश्चयाद् इति साध्यते।

शरीरात् शरीरान्तरं गच्छन् जीवः किं शरीरान्तरस्य आरम्भककारणीभूतैः भूतसूक्ष्मैः सह सम्परिष्वक्तः एव गच्छति, आहोस्विन्नेति संशयः। पूर्वपक्षस्तु यत्र यत्र अयं जीवः गच्छति, तत्र तत्र शरीराम्भकहेतुभूतानां भूतसूक्ष्माणां सुलभेन प्राप्यमानत्वात्, पूर्वशरीरस्थभूतसूक्ष्मैः सह असम्परिष्वक्त एव गच्छतीति। उत्तरपक्षस्तु भूतसूक्ष्मैः सह सम्परिष्वक्त एव गच्छति, छान्दोग्ये पञ्चाग्निविद्यायाम् एतद्विषयकप्रश्नप्रतिवचनानां भूतसूक्ष्मैः सह सम्परिष्वक्त एव जीव रंहतीति तात्पर्यावगमात्।

National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2022; 1(40): 123-126
© 2022 NJHSR
www.sanskritarticle.com

डा. सुदर्शनन् एस्.
महाचार्यः, विशिष्टाद्वैतवेदान्तविभागे,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-
विश्वविद्यालयः, नवदेहली 16

Correspondence:
डा. सुदर्शनन् एस्.
महाचार्यः, विशिष्टाद्वैतवेदान्तविभागे,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-
विश्वविद्यालयः, नवदेहली 16

# विशिष्टाद्वैतवेदान्तस्तदीयज्ञानमीमांसा च

डा. सुदर्शनन् एस्

श्रुतिवाक्यानि विशिष्टाद्वैतपरमेव सिद्धान्तं प्रतिपादयन्ति। अयञ्च सिद्धान्तः स्वयं भगवता श्रीमन्नारायणेनप्रपन्नानां जीवानां संसारात् मुक्तये उपदिष्टः। अस्य वेदान्तसिद्धान्तस्य आचार्यपरम्परायाम् आदौ भगवान् श्रीमन्नारायणः। तदनु श्रीः, तदनु विश्वक्सेनः, दिव्यसूरयः, नाथमुनिः, यामुनाचार्यः, रामानुजाचार्यः इति रीत्या भवति।

विशिष्टाद्वैतमिति विश्वविख्यातमिदं दर्शनशास्त्रं सर्वोत्कृष्टं वेदान्तसिद्धान्तस्य साररूपं तत्त्वत्रयं यथावत् प्रकाशयति। तत्त्वशब्दः यथार्थवस्तुबोधको भवति। तत्त्वानां त्रयं तत्त्वत्रयं भवति। तत्त्वत्रयम् इत्यनेनचेतनवर्गानां, अचेतनानाम्, इश्वरस्य च परिगणनं भवति। चेतनशब्देनजीवाःप्रतिपाद्यन्ते। अचेतनशव्दः प्रकृतेर्वाचकं भवति। ईश्वरशब्दश्च सर्वनियन्तृपरमात्मरूपं श्रीमन्नारायणं प्रतिपादयति। यद्यपि ब्रह्मैव एकं तत्त्वम्, अथापि तस्य ब्रह्मणः चेतनाचेतनविशिष्टरूपत्वात्, चेतनाचेतनयोः पृथक् परिगणनमुखेनापि, तत्त्वत्रयमित्यपि व्यवहारो वर्तते[1]।

**तत्त्वं जिज्ञासमानानां हेतुभिः सर्वतोमुखैः।**
**तत्त्वमेको महायोगी हरिर्नारायणः प्रभुः।।**[2]

इति भारतं वचःसमग्रप्रमाणैस्तत्त्वविचारयितॄणां चरमनिष्कर्ष एकमेव तत्त्वमिति बोधयति। अत्र समस्तचेतनाचेतनैः ब्रह्म विशिष्टमित्येव प्रतिपाद्यते। न कश्चिद्पदार्थ इह जगति अब्रह्मात्मको वर्तते। कृत्स्नमपि चेतनाचेतनं ब्रह्माधारितं, ब्रह्मनियन्त्रितं, ब्रह्मणः शेषभूतञ्च वर्तते। ब्रह्म शरीरी अन्यत् सर्वं तस्य शरीरं भवति। अस्माकं शरीरं यथा विशेषणभूतं प्रतिपाद्यते तथा ब्रह्मेतरं सर्वमपि ब्रह्मणः शरीरभूतम् अथ एव तद्विशेषणञ्च कथ्यते। अस्मासु अहन्त्वबुद्धिः देहेन्द्रियमनः प्राणादिविशिष्टे जीवे भवति।तद्वदीश्वरस्य चेतनाचेतनविशिष्टस्वस्वरूपेऽहन्त्वं परिलक्ष्यते। श्रुतिरपि **तदैक्षत बहु स्यां प्रजायेये**[3]ति ब्रह्मणः सृष्टिकालीनं सङ्कल्पं प्रकाशयति। ब्रह्म शास्त्रैकसमधिगम्यं भवति। उपासनादार्ढ्ये तत्प्रसादत एव तस्य साक्षात्कारः। अब्रह्मात्मकत्वेन अर्थात् स्वातन्त्र्येणवस्तूनां ज्ञानं वस्तुतोऽज्ञानकोटावेव भवति। **सर्वं खल्विदं ब्रह्म**[4], **जगत्सर्वं शरीरं ते**[5] इत्यादि प्रमाणानि ईश्वरस्य चेतनाचेतनविशिष्टत्वं स्पष्टं प्रकाशयति।

यस्य कस्यापि विशिष्टस्य प्रतीतिः तदीयविशेषणं, विशेष्यं, तयोः सम्बन्धश्चाश्रित्य भवति। चेतनाचेतनविशिष्टं ब्रह्मेति प्रतीतौ ब्रह्म विशेष्यं भवति, चेतनाचेतने तद्विशेषणे भवतः। ब्रह्मणः चेतनाचेतनेन सह शरीरात्मभावसम्बन्धो भवति। ब्रह्मणः विशेषणभूते उभयमपि चेतनाचेतनं परस्परमत्यन्तविलक्षणं भवति। कथञ्चिदपि चेतनम् चेतनस्वभावं, अचेतनं चेतनस्वभावं चप्रतिपत्तुं न समर्थं भवति। चेतनं सङ्ख्यया अनन्तं भवति। अचेतनं स्थूलतया चतुर्विंशतिसंख्याकमपि आनन्त्यमेव भजते। अचेतनस्य अवान्तरभेदानां परिगणयितुम् अशक्यत्वमेव तस्य कारणं भवति। एवमेव विशेषणभूते चेतनाचेतने तथा विशेष्यभूतं ब्रह्म च अत्यन्तविलक्षणं भवति। अद्वैतमित्यनेन ब्रह्मणः तयोश्च स्वरूपैक्यं नोच्यते तस्य सर्वप्रकारेण असम्भवग्रस्तत्वात्।

National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2022; 1(41): 174-176
© 2022 NJHSR
www.sanskritarticle.com

**डा. सुदर्शनन् एस्.**
महाचार्यः, विशिष्टाद्वैतवेदान्तविभागे,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-
विश्वविद्यालयः, नवदेहली 16

**Correspondence:**
डा. सुदर्शनन् एस्.
महाचार्यः, विशिष्टाद्वैतवेदान्तविभागे,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-
विश्वविद्यालयः, नवदेहली 16

# शरणागतिगद्यं तत्र श्रीः

**डा. सुदर्शनन् एस्**

विशिष्टाद्वैतवेदान्तप्रवर्तकाचार्यैः भगवद्रामानुजाचार्यैः नवग्रन्थाः रचिताः। यथा वेदान्तदीपः, वेदान्तसारः, श्रीभाष्यम्, वेदार्थसंग्रहः, श्रीमद्भगवद्गीताभाष्यम्, शरणागतिगद्यम्, श्रीरङ्गगद्यम्, वैकुण्ठगद्यम्, नित्यग्रन्थश्च । गद्यत्रयमिति नाम्ना प्रसिद्धं शरणागतिगद्यं , श्रीरङ्गगद्यं, वैकुण्ठगद्यञ्च भवति। भगवद्रामानुजाचार्याणांभगवतः श्रीरङ्गनाथस्य संवादरूपं शरणागतिगद्यं भवति। शरणागतिगद्यस्य निर्माणं द्रविडदेशे भूलोकवैकुण्ठनाम्नाप्रसिद्धे श्रीरङ्गक्षेत्रे श्रीरङ्गनाथमन्दिरे अभवत्। कालश्च फाल्गुनिमासे उत्तरफाल्गुनिनक्षत्रयुतं दिनं भवति। शरणागतिगद्यस्य प्रकाशनस्य प्रयोजनञ्चअखिलानां चेतनानां निःश्रेयसाधिगमो भवति। भगवद्रामानुजाचार्यः भगवति शरणागतिम् अनुतिष्ठति गद्येऽस्मिन्। शरणागतिगद्यस्य प्रास्ताविकः कश्चन श्लोकविशेषो वर्तते यदस्य गद्यविशेषस्य विषये प्रतिपादयति । यथा-

**लक्ष्मीपतेर्यतिपतेश्च दयैकधाम्नोः योऽसौ पुरा समजनिष्ट जगद्धितार्थम्।**
**प्राच्यं प्रकाशयतु नः परमं रहस्यं संवाद एष शरणागतिमन्त्रसारः।।**[1]

इति ।

अस्य शरणागतिगद्यस्य पृथुगद्यमित्यपि नाम एतस्य ग्रन्थस्य रहस्यरक्षाव्याख्याकारैः प्रकाशितः। यथा-

**वितमसि निगमान्तं विभ्रता देशिकत्वं**
**कृतिभिरनुमतेन क्षेमबुद्ध्या मयैवम्।**
**यतिपतिपृथुगद्यव्याक्रियायां यथावत्**
**कथितमकथितञ्च क्षम्यतां न संयुथ्यैः।।**[2]

इति।

शरणागतिमन्त्रस्य द्वयस्य त्रिपाद्विभूतिमहानारायणोपनिषत् पठितस्य व्याख्यानमत्र गद्ये बहुविधैः सम्बोधनैः सह प्राप्यते। परमरहस्यभूतं सांप्रदायिकं शरणागतेः अनुष्ठानप्रकारश्च प्रकाशितं विशेषः। द्वयमन्त्रश्च **श्रीमन्नारायणचरणौ शरणं प्रपद्ये, श्रीमते नारायणाय नमः**[3] इति। अयं मन्त्रः सत्सन्तानप्रमूतमदाचारनिष्ठ-वेदविदाचार्योपनीतात् व्रतनियमादिभिर्युक्तादाचार्यात् ग्रहणे नूनं फलदं भवति।

गद्येऽस्मिन् विद्यमानाः प्रत्येकं पङ्क्तयः चूर्णिकेति नाम्ना व्यवह्रियते। त्रयोविंशतिचूर्णिकाः सन्ति अत्र। प्रत्येकं चूर्णिकायां भगवतः स्वरूपवर्णनं, कल्याणगुणानां वर्णनमित्यादिकं प्राप्यते, इमानि वर्णनानि श्रुतिप्रमाणैः सिद्धान्येव भगवद्रामानुजाचार्येण प्रतिपादितानि। गद्यग्रन्थेऽस्मिन्पद्यानां शरणागतिशास्त्रविषयीभूतानां प्रसिद्धस्मृतीनां योजनमपि गद्यकारैः कृतः। यथा-

**पितरं मातरं दारान् पुत्रन् बन्धून् सखीन् गुरुन्।**
**रत्नानि धनधान्यानि क्षेत्रणि च गृहाणि च।।**[4]

ISSN - 2229-6336

# SUMANGALI

## A Journal of Gender and heritage

Vol. VIII, No. 1

March 2022

Research & Publication Department
Shri Lal Bahadur Shastri National Sanskrit University
(Central University)
New Delhi-110016

# CONTENTS ( अनुक्रम )


| | | | |
|---|---|---|---|
| 1. | श्रीसम्प्रदायकुलनन्दिनी श्रीगोदा | डॉ.सुदर्शनन् एस्. | 1–4 |
| 2. | नारीणां नभः ह्यः, साम्प्रतं श्वश्च | डॉ. आभा झा | 5–10 |
| 3. | अद्वैतवेदान्तविदुषी मदालसा | अमियकृष्णमिश्रः | 11–16 |
| 4. | अद्भुत रामायण में एक अध्ययनः शक्ति स्वरूपा सीता | डॉ. हर्ष बाला | 17–26 |
| 5. | सृष्टि की आधार स्त्री | डॉ. प्रवीण बाला | 27–32 |
| 6. | स्त्री संचेतनाः रामायण के परिप्रेक्ष्य में | डॉ. कल्पना शर्मा | 33–37 |
| 7. | वैदिक काल में नारी की बौद्धिक क्षमता | डॉ. नीलम गौड़ | 38–45 |
| 8. | कालिदास के साहित्य में नारी सशक्तिकरण | वन्दना रानी | 46–54 |
| 9. | बौद्ध संघ संरक्षिकाः उपासिका विशाखा | डॉ. शशी शर्मा | 55–61 |
| 10. | अथर्ववेदीय ऋषिकाओं का परिचय | कृष्णकान्त सरकार | 62–68 |
| 11. | ऊर्मिलीयमहाकाव्य में ऊर्मिला का चरित्र-चित्रण | चिरञ्जीत सरकार | 69–75 |
| 12. | The Portrayal of Woman in Kālidāsa's Plays | Dr. Kamna Vimal Sharma | 76–81 |

# श्रीसम्प्रदायकुलनन्दिनी श्रीगोदा

**डॉ.सुदर्शनन् एस्.**
सहाचार्यः,
विभागाध्यक्षः, विशिष्टाद्वैतवेदान्तविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः,
नवदेहली।

भारतीयज्ञानपरम्परायां विभिन्नाः सम्प्रदायाः उपलभ्यन्ते। यथा वैष्णव-शैवादयः। यद्यपीदानीन्तने काले हिन्दूसम्प्रदायाः अथवा हिन्दूइसम् इति एकरूपेण व्यवहारः तत्तु राजनीत्यां क्रियते। तत्र तत्र एकधा रीत्यापि क्रियते, कथञ्चित् क्रियते वा वास्तविकतया तत्तत्सम्प्रादयानुसारिणां दैनिकव्यवहारे साम्प्रदायिकव्यवहारे वा भिन्नभिन्नानि अनुष्ठानानि भिन्नभिन्नतया तत्तज्ज्ञानप्रदर्शनं विभिन्नाः उपदेशपरम्पराश्च पुरस्क्रियन्ते, तैस्तैः सम्प्रदायस्तैः। तादृशेषु बहुषु सम्प्रदायेषु कथं सम्पूर्णतया तेषां ज्ञानं लब्धुं शक्यते चेत् सर्वैः सर्वसम्प्रदायज्ञानविषयं प्रायशो दुश्शकम्। तत्तत्सम्प्रदायस्तैः तत्तत्सम्प्रदायविषयज्ञानं सुतरां लभ्यते। तत्रापि परिश्रमेण सत्सम्प्रदायज्ञानाय, तस्य विस्तरेण ज्ञानाय इतरसम्प्रदायाणां तत्त्वप्रदर्शनम् अनुष्ठानप्रकाराश्च केचन अधीयन्ते एव। अत एव दर्शनमित्येको विभागः प्रायशः बह्वीषु सर्वकलाशालासु दृश्यते प्रचाल्यते वा। तत्र विमर्शकैः विभिन्नज्ञानविषयकपरम्पराः अथवा सम्प्रदायाः ज्ञानमार्गरीत्या पृथक्-पृथक्-रीत्या व्यवह्रियन्ते अथवा पूजनप्रकारक्रमेण उपासनक्रमे वा तत्र तत्र पृथक्-पृथक्तया व्यवह्रियन्ते। प्रसिद्धाः अद्वैत-विशिष्टाद्वैत- द्वैतसम्प्रदायाः ज्ञानमार्गाः। एतेषां त्रयाणां यद्यपि वेदाः उपनिषदः इतिहासपुराणानि धर्मशास्त्रादिकं सर्वं प्रमाणतया पुरस्क्रियते उदाह्रियते उद्ध्रियते निरूप्यते च। तथापि मूलभूतस्य ब्रह्मसूत्रात्मकग्रन्थस्य कृष्णद्वैपायनस्य व्यासरचितस्य अङ्गभूतानां सूत्राणां यानि तत्तत्सम्प्रादायाचार्यैः व्याख्यानानि कृतानि तद्व्याख्यानमूलभूतग्रन्थप्रदर्शनभूताः तत्सम्प्रदायस्तानां भवन्ति। तस्मिन् ज्ञानमार्गे ब्रह्मसत्यं जगन्मिथ्या ब्रह्मण एव एवं जगदात्मना परिणामः अविद्यया लब्धः। यः कोऽपि उपासकः वाक्यार्थज्ञानेन बहूनि वाक्यानि निर्दिशति, तथापि अहं ब्रह्मास्मीति उपास्यं अद्वितीयं ब्रह्म प्राप्नोति। अर्थात् अद्वैतं ब्रह्म प्राप्नोति। अयं तु सामान्यतया उच्यन्ते तत्तत्सम्प्रदायेषु विशेषाः अर्थाः उपस्थाप्यन्ते। ज्ञानमार्गः कश्चिद् अद्वैतमार्गः, विशिष्टाद्वैतिभिः एकमेव ब्रह्मतत्त्वं तदाश्रयणमेव हि तं तस्य वैकुण्ठाख्ये लोके तदनुभवः पुरुषार्थः तस्य शरीरभूताः चेतनाः तादृशपुरुषार्थलाभाय तच्चरणं नामाश्रयणं तद्धितम् आचरेयुः इत्यादिकं उपदिश्यते। स च विशिष्टाद्वैतमार्गो भवति। विशिष्टस्य ब्रह्मणः अद्वितीयता अद्वैतं विशिष्टाद्वैतमिति तत्र प्रदर्शनं भवति।